

# सोमज्योतिः

**Shree Somnath Sanskrit University**
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in

University Newsletter
Issue: **16** Month: **April** Year: **2017-18**

Issue : 16 May 2017 - April 2018 Year : 2017-18


## ॥ कुलपतिवाक् ॥

सोमज्योतिर्नाम विश्वविद्यालयस्य वृत्तान्तपत्रिका षाण्मासिकी प्रकाश्यमानासीत्, किन्तु कार्यान्तरेषु व्यापृतानाम् अल्पप्राध्यापकानां समयाभावात् इयं वृत्तान्तपत्रिका अङ्कद्वयस्य संयोजनेन जून २०१७ तः मई २०१८ पर्यन्तस्य वृत्तान्तैः साकं प्राकाश्यमानीयते इति संतोषस्य विषयः।

एकवर्षात्मके कालेऽस्मिन् अन्ताराष्ट्रियोगदिवसायोजनं, युवक-महोत्सवायोजनं, बाप्ससंस्थायाः आर्थिकसहायतया निर्मितस्य विश्व-विद्यालयभव्यद्वारस्य लोकार्पणं, दशमपदवीदानसमारोहस्यायोजनं, व्यायामशालाया उद्घाटनम् इति बहवः कार्यक्रमाः सोत्साहं सम्पादिताः।

प्रतिवर्षद्वयं केनापि विश्वविद्यालयेन आयोक्ष्यमाणस्य अखिलभारतीय-प्राच्यविद्यासम्मेलनस्य त्रिदिवसीयम् आयोजनं श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन १८-२० मई २०१८ पर्यन्तं कृतम्। यत्र देशस्य नाना-विश्वविद्यालयेभ्यः प्राच्यविद्यायाः विद्वांसः समागत्य शोधपत्रं प्रस्तुतवन्तः। शोधपत्रसारांशः प्रज्ञापीयूषम् इति पुस्तकनाम्ना प्रकाशितः।

कार्यक्रमस्य उद्घाटनं पूर्वमुख्यमन्त्रिणः श्रीकेशुभाई पटेलमहोदयाः कृतवन्तः, मुख्यातिथिरूपेण शिक्षणमन्त्रिणः श्रीभूपेन्द्रसिंह चूडासमामहोदयाः अन्ये च लब्धख्यातयो विद्वांसः उपस्थिता आसन्। सम्पूर्तिदिवसे भागवतकथाविशेषज्ञाः पूज्य श्रीरमेशभाई ओझा (पू. भाईश्री) महोदयाः मुख्यातिथिरूपेण अन्ये च अखिलभारतीयप्राच्यविद्यासम्मेलनस्य पदाधिकारिण उपस्थिताः आसन्। अस्मिन् अवसरे कुलपतयः प्रो. अर्कनाथचौधरीमहोदयाः सहयोगिसंस्थासदस्यानां सम्माननम् अकुर्वन्।

इत्थमङ्कोऽयं वार्तापत्रस्य अत्यन्तं महत्त्वपूर्णः। अस्य सम्पादने कृतश्रमाणां श्रीरवीन्द्रकाले, डॉ. पङ्कजरावल महोदयानां कृते तथा सहयोगिनां विदुषां कृते शुभाशंसनं करोमि। सोमज्योतिः सर्वदा चान्द्रीं ज्योत्स्नां प्रकाशयेत् इति भगवन्तं श्रीसोमनाथं प्रार्थये।

**प्रो. अर्कनाथ चौधरी**

## विद्यावारिधिशोधचर्चासमितिः (R.D.C. of Ph.D)

विश्वविद्यालयानुदानयोगस्य (UGC) नियमानुसारं श्रीसोमनाथ-संस्कृतविश्वविद्यालयेन २०१७-१८ इति शैक्षणिकवर्षस्य कृते विद्या-वारिधिप्रवेशपरीक्षायाः आयोजनं कृतम्। विद्यावारिधिप्रवेशपरीक्षार्थं अष्टसप्ततिः (७८) शोधार्थिनः पञ्जीकरणं कृतवन्तः । तेषां अष्टादश (१८) शोधार्थिनः उत्तीर्णाः जाताः।

२०१५-१६ शैक्षणिकवर्षस्य एकं (१) तथा च २०१७-१८ शैक्षणिकवर्षस्य अष्टादश(१८) शोधार्थिनः आहत्य एकोनविंशतेः(१९) शोधार्थिनां कृते विद्यावारिधि-कार्यशालायाः(Ph.D Course Work) आयोजनं १५-०६-२०१७ तः २४-०६-२०१७ यावत् परिसरे जातम्। तत्र सप्तदश (१७) शोधार्थिनः उपस्थिताः आसन्। तदनन्तरं तेषां शोधार्थिनां कृते शोधचर्चासमितेः (Research Discussion Committee) आयोजनं कृतम्। श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य मान्याः कुलपतयः प्रो. अर्कनाथ चौधरीमहाभागा समितेः आध्यक्ष्यं अलङ्कृतवन्तः। तत्र प्रो.सुरेशकुमारशर्मा, डॉ. रामपालशुक्ला चापि विषयनिष्णातरूपेण उपस्थिता आसन्।

## संस्कृतसप्ताहोत्सवः - २०१७


श्रीसोमनाथसंस्कृतविश्वविद्यालयेन माननीयकुलपतिमहोदयस्य निर्देशानुसारम् ऑगस्टमासस्य प्रथमदिनाङ्कात् अष्टमदिनाङ्कं यावत् विश्वविद्यालयपरिसरे संस्कृतसप्ताहोत्सवः आयोजितः। अस्मिन् कार्यक्रमे विश्वविद्यालये भाषण-निबन्धलेखन-समूहगान-स्तोत्र-कण्ठपाठ-रङ्गावली-स्फूर्तिस्पर्धा-साहित्यरचनाद्याः बहव्यः स्पर्धाः आयोजिताः, यत्र विद्यालयस्तर-विश्वविद्यालयस्तरच्छात्रैः भागः गृहीतः। अस्मिन् संस्कृत-सप्ताहोत्सवे विभिन्नविषयेषु नैकेषां विदुषां भाषणानि आपि समजायन्त । यथा


१. प्रो. चन्द्रकान्त शुक्लः
२. डॉ. मीना शुक्लः
३. डॉ. दिनेशचन्द्र नेगांधी


अस्य संस्कृतसप्ताहोत्सवस्य समापनसमारोहः ०८/०८/२०१८ तमे दिनाङ्के अभवत् यत्र संस्कृतसप्ताहोत्सवस्य समग्रं संयोजनं डो.जानकीशरण आचार्यः डॉ. दिपेश कतिरा च अकुरुताम्।











**Chief Editor**
Prof. Gopabandhu Mishra

**Publisher**
Dr. Dashrath Jadav

**Managing Editor**
Ravindra S. Kale

**Editor**
Dr. Pankaj Kumar Rawal

News/Reports of events are invited for their publication in **SOMAJYOTI** *(Bi-annual Newsletter of Shree Somnath Sanskrit University)* from affiliated colleges, recognized study centers & approved research centers of Shree Somnath Sanskrit University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

**Address:**
**The Editor**
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist. Gir-Somnath, Gujarat–362 266.
(O) 02876-244532

**E-mail:** sssu.veraval@gmail.com

Statement about the ownership and other particulars about newspapers

**SOMAJYOTI**

**FORM IV**

(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

1. Place of the Publication : Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication : Bi-annual (Half-Yearly)
3. Printer's Name : H.K. Offset
   Nationality : Indian
   Address : 5, First Floor, Madresa Building, M.G.Road, Veraval, Gujarat-362265
4. Publisher's Name : The Registrar
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name : Prof. Vempaty Kutumba Sastry
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266

I, Dr. Dashrath Jadav, Registrar (I/c), Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

## ।। कुलपतिदैनन्दिनम् ।।

| | |
|---|---|
| 10-07-2017 | **Participated** in a National Convention on Digital Initiatives for Higher Education at Vigyan Bhavan, Rajpath Area, Central Secretariat, New Delhi-110 001. |
| 18-19/07-2017 | **Chairperson** of NAAC Peer Team in the accreditation of Dharma Samaj Sanskrit College, Muzzafarpur- 42001 (Bihar) |
| 26-07-2017 | **Chaired** the meeting of all principals of University affiliated Mahavidyalayas/Colleges at Shree Vartantu Sanskrit Mahavidyalaya, Sola, Ahmedabad. |
| 20-08-2017 | Rmained present in Tablet Distribution Program at Gunatitanand Sabhamandap Aksharpurushottam Swaminarayan Temple, Junagadh |
| 22-24/08-2017 | **Chairperson** of UGC's Review Committee to review Rashtriya Sanskrit Vidyapeetha, Tirupati, Andhra Pradesh |
| 26-27/08-2017 | **Special Guest** in a National Seminar organised at Dwarkadhish Indological Research Institute, Dwarka |
| 31-08-2017 | Remained Present in Shashti Purti Programme of Shri Rameshbhai Oza at G.M.D.C. Ground, Helmet Cross Road, Memnagar, Ahmedabad. |
| 08-09/09-2017 | **Chairperson** of NAAC Peer Team in the accreditation of Hindi Mahavidyalaya, Osmania University Road, Hydrabad-500044 (Telangana) |
| 11-09-2017 | **Chief Guest** in All India National Vedic Conference at Samkhiyali (Kuttch) |
| 13-09-2017 | Meeting with Principal Secretary, Department of Higher Education, and Government of Gujarat to solve different issues pertaining to University Administration. |
| 20-09-2017 | Remained present in a Joint Board of Vice-Chancellors (JBVC) at Syndicate Hall, Saurashtra University, Rajkot |
| 11-12/10-17 | **Chairperson** of UGC's 12(B) Committee to review Thunchath Ezhuthacha Malayalam University, Mohan Villas, Pukayil PO, Tirur, Mallapuram (Kerala) |
| 27-10-2017 | **Chairperson** of Review Committee to review Sanatan Dharm Adarsh Sanskrit Mahavidyalaya, Dohgi, Bangana), Dist:-Una, Himachal Pradesh-174307 |
| 10-11-2017 | **Special Guest** in a National Seminar organized at Swaminarayan Temple, Jetalpur, Ahmadabad |
| 14-11-2017 | Meeting with Principal Secretary, Department of Higher Education, Government of Gujarat to Solve different issuespertaining to University Administration at KCG, Ahmedabad |
| 15-11-2017 | **Visit** of Swaminarayan Temple, Vadtal and Brahmarshi Sanskrit Mahavidyalaya, Nadiad and Santram Temple, Nadiad |
| 16-11-2017 | **Remained Present** in a Programme of Swaminarayan Temple Atladara, Vadodara (Gujarat) |
| 17-21/11-2017 | **Chairperson** of Review Committee of Adarsh Sanskrit Mahavidyalaya Jangla (Shimla) and Haridwar to review. |
| 27-28/11-2017 | **Remained present** in the West Zone All VC's meet of AIU in IITE, Ramkrishna Paramhans Education Complex, Nr. Mahatma Mandir, Gandhinagar |
| 07-08/12-2017 | **Remained present** in a Vice Chancellor's workshop organized by National University of Planning and Administration, 17-B, Sri Aurobindo Marg, Opp. Adchini, New Delhi-110016 |
| 24-25/12-2017 | **Chief Guest** in the 35th Convocation Ceremony of Sampurnanad Sanskrit University, Varanasi (Uttar Pradesh) |
| 12-01-2018 | Meeting with Principal Secretary, Department of Higher Education, Government of Gujarat to Solve different issues pertaining to University Administration and New Budget at the office of Principal Secretary, Gandhinagar. |
| 20-01-2018 | Remained present in the Celebration 12th Patotsava of Shri Hari Mandir at Sandipani, Porbandar. |
| 23-01-2018 | Received a Honor of "Kalidas Rangbharati" on the occasion of Utter Pradesh Foundation day given by Rangabharati and Uttar Pradesh Nagarik Parishad in the Presence of Honourable Governor, Uttar Pradesh Government. |
| 28-01-2018 | Remained present in the Celebration of Gondal Akshardary Shatabadi Mahostav at Gondal, Dist. Rajkaot. |
| 30-01-2018 | Meeting with Hon. Education Minister, Gujarat State in the office of Minister, Gandhinagar and attending A.I.O.C Planning meeting. |
| 02-04/02-2018 | Remained present in the Afternoon meeting of "Grand Education Fair" at Gujarat University Convention and Exhibition Centre, Ahmedabad |
| 24-02-2018 | Delivered a Lecture in Mahamahim Pandit Madanmaohan Malaviya Vyakyanmala at Banaras Hindu University, Varanasi. |
| 11-03-2018 | Saraswat Athithi in a Valedictory ceremony of Yuvak Mahostav at K J Somaiya Sanskrit Vidhyalaya, Mumbai. |
| 26-03-2018 | Chief Guest on the occasion of khatmuharat of New Building at BAPS Swaminarayana Sanskrit Mahavidhyalaya, Sarangpur. |
| 27-03-2018 | Remained Present in Senate and Syndicate election at Sardar Patel University, Vallabh Vidhyanagar. Anand. |
| 26-03-2018 | Chief Guest on the occasion of khatmuharat of New Building at BAPS Swaminarayana Sanskrit Mahavidhyalaya, Sarangpur. |
| 27-03-2018 | Remained Present in Senate and Syndicate election at Sardar Patel University, Vallabh Vidhyanagar. Anand. |
| 28-03-2018 | Remained Present in Joint Board of Vice Chancellor Meeting at Maharaja Krishnakumarsinghji Bhavnagar University, Bhavnagar. |
| 03-04-2018 | Meeting with Shri O.P Kohaliji, Honourable Governor, Gujarat Government regarding 49th All India Oriental Confernece-2018 and courtesy meeting with Hon. Chief Minister shri Vijaybhai Rupaniji, Gujarat Government |
| 2-04-2018 | Distinguished speaker on University Foundation Day Lecture of Ganapat University at Ganapat Uni, Mahesana. |
| 3-04-2018 | Remained Present in BAOU National Seminar at Babasaheb Ambedkar Open University, Ahmadabad. |
| 16-04-2018 | Government's Confidential Work. |
| 27-04-2018 | Remained Present in a Meeting Chaired by Honourable Chief Minister Shri Vijay Rupaniji, Gujarat Government with Vice Chancellors of Gujarat at Gandhinagar. |

## हरितक्रान्ति–सौरऊर्जासम्मेलनम् एवं च वनमहोत्सवः
## राष्ट्रियसेवायोजनान्तर्गतः वनमहोत्सवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटीसंचालित – संस्कृत कोलज (रा.से.यो.) विभागः एवं च गिर–सोमनाथ वनविभागः इति द्वयोः संयुक्तरीत्या समायोजित–तालुकाकक्षा ६८ (अष्टषष्टितमो) वनमहोत्सवान्तर्गतं १५१ वृक्षाणां रोपणं ०२–०८–२०१७ दिनाङ्के बुधवासरे प्रातः ११.३० तः द्विवादनं यावत् जातम्। उद्घाटनसमारोहे आस्मिन् माननीयकुलपतिश्री, प्रो. अर्कनाथचौधरीमहोदयाः कार्यक्रमाध्यक्षाः, मुख्यातिथिः श्रीराजसीभाई–जोटवा धारासभ्य, वेरावलम्, श्रीसरमणभाई वेजानंदभाई सोलंकी, मान. प्रमुखश्री तालुका भाजप, वेरावलम्, श्री के ए गांधी नायब वन संरक्षकः,



वेरावलम्, श्री नरेन्द्रकुमार एल् पण्ड्या, आचार्यश्रीः सोमनाथ संस्कृत युनिवर्सिटी संलग्न सोमनाथ संस्कृत कोलज, वेरावलम्, श्री ओ. के. डोडिया रेन्ज फोरेस्ट ओफिसरः, वेरावलम्, डॉ. महेन्द्रकुमार दवे, का. कुलसचिवश्रीः श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावलम्, अनुस्नातकभवनाध्यक्षः प्रो. विनोदकुमार झा, अन्ये अध्यापकाः, कर्मचारिणः, विंशति वनविभागः अन्ये छात्राः, पञ्चशताधिकं कर्मचारिणः, कार्यक्रमे अस्मिन् उपस्थिताः आसन्। सम्पूर्ण– कार्यक्रमस्य संयोजनं रा. से. योजना ओफिसर डॉ. रमेशचन्द्रशुक्लमहोद

## सिंहदिवसः

प्रतिवर्षे राष्ट्रियसिंहदिवसस्य आयोजनं भवति तथैव अस्मिन् वर्षेऽपि १०–०८–२०१७ तमे दिनाङ्के सिंहदिवसस्य आयोजनं श्रीसोमनाथ–संस्कृतविश्वविद्यालय–श्रीसोमनाथसंस्कृतयुनिवर्सिटीसंञ्चालितसंस्कृत–



कोलेजद्वारा आयोजितम्। अस्मिन् कार्यक्रमे सिंहस्य मुखाकृतिं धृत्वा विश्वविद्यालयस्य अधिकारिणः प्रो.विनोदकुमार झा, प्रो. देवेन्द्रनाथ पाण्डेयः, प्रो. अर्चनादूबे, प्राचार्य श्रीनरेन्द्रकुमार एल पण्ड्या, डॉ. जयेशकुमार मुंगरा, डॉ. शत्रुघ्न पाणिग्रही, डॉ. उमामहेश्वरी, डॉ. जानकीशरणआचार्य, डॉ. पङ्कजकुमार रावल, डॉ. डाह्याभाई मोकरिया, डॉ. दिपेश कतिरा आदयः सर्वे अध्यापकाः कर्मचारिणः छात्राः छात्रभगिन्यश्च आसन्। कार्यक्रमे अस्मिन् विश्वविद्यालयस्य जनाः सिंहस्य मुखं धृत्वा राजेन्द्रभुवनमार्गपर्यन्तम् एकस्याः सिंह–शोभायात्रायाः आयोजनं कृतवन्तः। कार्यक्रमे अस्मिन् सार्धैकशतं जनाः आसन्। अस्मिन् कार्यक्रमे सिंहदिवसस्य संबोधनं प्रो. विनोदकुमार झामहोदयाः कृतवन्तः। कार्यक्रमस्य समग्रं संयोजनं डॉ. रमेशचन्द्रशुक्लः एवं च डॉ. जयेश मुंगरा इति उभौ कृतवन्तौ।

## स्वातन्त्र्यपर्व

प्रतिवर्षमिव अस्मिन्नपि वर्षे स्वातन्त्र्यपर्व श्रीसोमनाथसंस्कृतविश्वविद्यालये १५–०८–२०१७ तमे दिनाङ्के समाचरितम्। प्राचार्यस्य डॉ. नरेन्द्रपण्ड्या महोदयस्य संयोजकत्वे आयोजितेऽस्मिन् कार्यक्रमे कुलपतिभिः सह ध्वजवन्दनं विहितम्। कुलपतेः भाषणं जातं ध्वजवन्दनानन्तरं सांस्कृतिकः कार्यक्रम आयोजितः, यत्र देशभक्तिगीतं, छात्राणां प्रतिभाः, नाटकं, समूहगीतं, नृत्यम् इत्यादीनां विद्यार्थिभिः प्रस्तुतिः कृताः। कार्यक्रमे सर्वेऽपि अधिकारिणः छात्राश्च उपस्थाय राष्ट्रभक्तिं प्रदर्शितवन्तः। कार्यक्रमस्य व्यवस्थापनं सञ्चालनं च डॉ. जयेशमुंगरा महोदयः अकरोत्।





## शिक्षकदिवस कार्यक्रम



## त्रिदिवसीयाखिलभारतीयवैदिकसंगोष्ठी

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, उज्जैनस्य-महर्षि सान्दिपनीराष्ट्रियवेदविद्याप्रतिष्ठानम्, एवञ्च सन्तश्री सन्ध्यागीरीबापुसंस्कृत-महाविद्यालयः, सामख्याली इत्येषां संयुक्ततत्त्वावधाने एका त्रिदिवसीया अखिलभारतीया वैदिकसंगोष्ठी ११-०९-२०१७ तः १३-०९-२०१७ पर्यन्तम् आयोजिता। तत्र कार्यक्रमस्य उद्घाटनसत्रे दिनाङ्के ११-०९-२०१७, सोमवासरे गुजरातराज्यस्य महामहिमशालिनः राज्यपालाः प्रो. ओ.पी. कोहलीमहोदयाः कार्यक्रमस्य उद्घाटकरूपेण उपस्थिता आसन्। अस्यां संगोष्ठ्यां मुख्यातिथिरूपेण योगदानं दत्वा श्रीसोमनाथसंस्कृतविश्व-विद्यालयस्य कुलपतिपादाः प्रो. अर्कनाथचौधरीमहाभागाः सर्वान् उद्बोधितवन्तः। महर्षिसान्दीपनीराष्ट्रियवेदविद्याप्रतिष्ठानस्य उपाध्यक्षाः प्रो. रवनीन्द्रमुले महाभागाः मुख्यवक्तृरूपेण योगदानं विधाय सभायाः शोभावर्धनं कृतवन्तः। कार्यक्रमस्य संयोजकः डॉ. शत्रुघ्नपाणिग्राहिमहोदयः प्रास्ताविकं तथा च कार्यक्रमस्य रूपरेखाविषयं सूचितवान्। कार्यक्रमेऽस्मिन् कर्मकाण्डसंस्कारविज्ञानमिति विचारालोके बहूनि शोधप्रत्राणि विभिन्न-प्रदेशेभ्यः समागतैः विद्वद्भिः प्रस्तुतानि। तत्रापि प्राप्तानां शोधपत्राणां कर्मकाण्डसंस्कारविज्ञानं पुस्तकरूपेण प्रकाशनं जातम्। प्रकाशनकर्मणि तथा च आवासभोजनादिव्यवस्थायां तत्रत्याः स्वामिनारायण भगवङ्गिरी-महोदयानां योगदानम् अतीव महत्त्वपूर्णम् आसीत्। कार्यक्रमस्य समापनसत्रेपि अध्यक्षरूपेण सभामण्डपं मण्डयन्तः माननीयाः कर्णाटकराजस्य महामहिम-राज्यपाल-महोदया आसन्। तस्मिन् दिवसे मुख्यवक्तृरूपेण कच्छप्रान्तस्य सांसदः श्री विनोदभाईमहोदयाः, विशिष्टातिथिरूपेण अजमेरतः समागताः स्वामिचरणाः श्री शिवन्योतिषानन्दगिरीमहोदयाः, सारस्वतातिथिरूपेण श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य मान्याः का. कुलसचिवपादाः प्रो. महेन्द्रकुमार दवेमहाभागाः उपस्थिता आसन्। येषां महानुभवानां आगमनेन कार्यक्रमः सुसम्पन्नः सञ्जातः तेषु वैदिकेषु प्रो. श्रीकिशोरमिश्राः, प्रो. लक्ष्मीश्वर झा, प्रो. मनोजमिश्रः झा, प्रो. रामराज उपाध्यायाः, प्रो. रवीन्द्र भट्टाचार्यमहोदयाः, प्रो. महेन्द्रपाण्डेमहोदयाः, प्रो. प्रभातरञ्जनमहापात्राः, प्रो. कमलेशमिश्राः, प्रो. प्रतिभामञ्जरीरथ-महोदया, प्रो.कमलेश चोक्सिमहाशयाः, प्रो. प्रलयकुमारनन्दमहोदयाः, प्रो. विश्वनाथस्वाईमहाशयाः, प्रो. दुर्गाचरणषडङ्गोमहोदयाः, प्रो. हितेषजानी महोदयाः तथा च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सर्वे आचार्याः, प्राचार्याः, उपाचार्या आसन्। अस्य कार्यक्रमस्य निर्देशकः प्रो. देवन्द्रनाथ पाण्डेय आसीत्। माननीयानां कुलपतिपादानां कुलसचिवपादानां च मार्गदर्शनेन कार्यक्रमस्य संयोजकरूपेण डॉ. शत्रुघ्नपाणिग्राहिमहोदयः कार्यम् अकरोत्। समापनसत्रे कार्यक्रमस्य प्रतिवेदनं प्रो. विनोदकुमारमहोदयैः प्रस्तुतम्। समापनसत्रे च सुचारु सञ्चालनं डॉ. अश्विन राजगोर महोदयैः कृतमासीत्।

## वेद-वेदाङ्ग संकायायोजित-त्रीदिवसीय शास्त्रपुनश्चर्या कार्यशाला

सामख्यालीस्य सन्तश्री सन्ध्यागिरीबापु संस्कृतवेदविद्यालये श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसङ्कायेन आयोजिता त्रिदिवसीया शास्त्रपुनश्चर्याकार्यशाला (११-०९-२०१७ तः १३-०९-२०१७ पर्यन्तम् जाता) तत्र कार्याशालायां विश्वविद्यालयस्य सम्बद्धमहाविद्यालयेषु पञ्चत्रिंशत् विद्वांसोऽध्यापकाः शोधच्छात्रा भागग्रहणं कृतवन्तः। तत्र अध्ययनविषय आसीत् ऋगवेदभाष्यभूमिकांवेदशास्त्रस्य', 'लघुपाराशरीज्योतिषशास्त्रस्य। अस्यां कार्यशालायां येषां महानुभवानां व्याख्यानं सञ्जातं ते सन्ति प्रो. लक्ष्मीश्वर झा महाभागाः, प्रो. श्रीकिशोरमिश्रमहोदयाः, डॉ. राजेन्द्रपण्डया महोदया, डॉ. शत्रुघ्नपाणिग्राहिमहोदयाः, डॉ. रमेशचन्द्रशुक्लामहोदयाः. डॉ. अश्विनभाई राजगोरमहशयाः, प्रो. एच. एम पाण्ड्ये महोदयाः, डॉ. राजेन्द्रप्रसाद शुक्लामहोदयाः। अस्यां कार्यशालायाम् आहत्य नव व्याख्य्यानानि जातानि । अस्य कार्यक्रमस्य संयोजकः डॉ. शत्रुघ्नपाणिग्रहिमहोदयस्य सविधे कार्यशालायाः पूर्णं विवरणं विद्यते।

## हिन्दी पखवाडिया

माननीयकुलपतिश्रीमहोदयानां निर्देशानुसन्धाने हिन्दी पखवाडिया-कार्यक्रमः दिनाङ्क १४-०९-२०१७ तः २८-०९-२०१७ पर्यन्तं समायोजितः तथा च अस्मिन् कार्यक्रमे स्पर्धात्रयस्यायोजनमभवत्।

१. निबन्धलेखनविषयः - हिन्दीभाषा का महत्त्व एवं उसकी उपयोगिता.

२. हिन्दी कविता लेखन स्पर्धा.

३. हिन्दी टाईपिंग एतेषु निबन्धलेखनस्पर्धा-हिन्दीकविता-लेखनस्पर्धा, एतयोः द्वयोः स्पर्धयोः स्पर्धकाः भागं गृहीतवन्तः, छात्राः निबन्धलेखनम् एवं कवितालेखनस्पर्धाद्वये भागं गृहीतवन्तः। निबन्धलेखनस्पर्धायां ओफिससुप्रिटेन्डटतः अधोवर्तिकर्मचारिणः ये मात्रा निबन्धलेखनस्पर्धायां भागं गृहीतवन्तः तेषु निबन्धलेखनस्पर्धायां-प्रथमस्थानं प्राप्तम् अपारनाथीमहेन्द्रगीरीः (जूनियर क्लार्क), द्वितीयं स्थानं प्राप्तम् जानी हितेश सी. (जूनियर क्लार्क) तथा श्वेता एल्. जानी (जूनियर कलर्क) तथैव क्रमे आगताः छात्राः निबन्धलेखनस्पर्धायां प्रथमक्रमे अरुणकुमार पाण्डेयः (आचार्यद्वितीयवर्षम्), द्वितीय स्थाने गामीत मनीषा (आचार्यद्वितीयवर्षम्), तृतीयस्थाने रावल जितेन्द्र बी. (शास्त्रीप्रथमवर्षम्) छात्रः। तथैव हिन्दी कवितालेखनस्पर्धायां प्रथमस्थानं गणेश पन्तः (शास्त्रीप्रथमवर्षम्), द्वितीयस्थानम् अरुणकुमार पाण्डे (आचार्यद्वितीयवर्षम्) एवं राजपूत शिवेन्द्रसिंह (शास्त्रीयप्रथमवर्षम्) छात्रौ प्राप्तवन्तौ। जोषी अमन आर.

(शास्त्रीयप्रथमवर्षम्) छात्रः तृतीयस्थानं लब्धवान्। एवं प्रथमस्थानं प्राप्तकृतवते छात्रकर्मचारिणे पञ्चमे भोजनपात्रं (टिफिन) एवं प्रमाणपत्रम् दत्तवन्त, द्वितीयं एवं च तृतीयस्थानंप्राप्त छात्राः प्रमाणपत्राणि लब्धवन्तः। अस्य कार्यक्रमस्य समापनावसरे माननीय कुलपतीश्रीअर्कनाथचौधरीमहोदयाः प्राचार्यश्रीवाचस्पतीमिश्रः, जेतलपुरः, पूर्वप्राचार्य श्रीनिरौलाजी, नडियादम् अन्ये सर्वेपि अध्यापकाः कर्मचारिणः छात्राश्च आसन्। अस्य कार्यक्रमस्य संयोजकौ प्रो. विनोदकुमार झा एवं प्राचार्य श्री नरेन्द्र एल पण्ड्यामहोदयश्च आस्ताम्। अस्य कार्यक्रमस्य सहसंयोजकः संचालकत्वेन डॉ. रमेशचन्द्रशुक्ल महोदया आसन्।







## वाक्यार्थपरिषद्व्याख्यानमाला २०१६-२०१७

वाक्यार्थपरिषद् २०१६-१७ सत्रस्य व्याख्यानमाला दिनाङ्क ०२-०६-२०१६ तः २-०६-२०१७ वर्षैकपर्यन्तं प्रचालितवन्तः। अस्मिन् वर्षे सप्ताधिवेशनानि जातानि तेषु प्रथमाधिवेशनं १५-०६-२०१६ दिनाङ्के अभवत्। अस्य सत्रस्य सत्राध्यक्षाः मुख्यवक्ता च माननीयकुलपतयः प्रो. अर्कनाथ-चौधरीमहाभागा आसन्। महोदयस्य विषयः **धात्वार्थविमर्शः** आसीत्। द्वितीयवक्तृरूपेण डॉ. दशरथजादवः कुलसचिवः, विषयः **विश्वविद्यालयस्य विकासे प्रशासनस्य भूमिका** तृतीयवक्तृरूपेण प्रो. विनोदकुमारझामहोदया आसन् विषयः **सूत्रार्थविमर्शः** आसीत्।

द्वितीयाधिवेशनं ०६-०१-२०१७ दिनाङ्के जाते अस्य सत्रस्य सत्राध्यक्षाः प्रो. विनोदकुमारझामहोदया आसन् वक्तृरूपेण प्रो. देवेन्द्रनाथ पाण्डेय, विषयः पाश्चात्त्यविदुषां संस्कृतानुरागः, डॉ. नरेन्द्रकुमार एल्. पण्ड्यामहोदयस्य विषयः **श्रीमद्भगवद्गीतानिभावितभावाः,** डॉ. महेन्द्रकुमार दवे महोदयानां विषयः **शान्तोऽपि नवमो रसः।**

अतः परं तृतीयाधिवेशनं २०-०१-२०१७ दिनाङ्के जातं अस्य सत्रस्य सत्राध्यक्षाः प्रो. देवन्द्रनाथपाण्डेयमहोदया आसन् वक्तृरूपेण डॉ. पङ्कजकुमाररावलः, विषयः **चातुर्वर्ण्यं मया सृष्टम्,** डॉ. डाह्यालाल मोकरिया, विषयः **मित्रस्य परिभाषा,** डॉ. अमृतलाल भोगायता, विषयः **रमणीयार्थप्रतिपादनम्** तथैव चतुर्थाधिवेशनं दिनाङ्क ३०-०१-२०१७ दिनाङ्के जातम् अस्य सत्रस्य सत्राध्यक्षाः प्रो. विनोदकुमारझामहोदयाः पुनः सत्राध्यक्षाः तथा वक्तृरूपेण प्रो. अर्चना दूबे विषयः **रसविमर्शः,** डॉ. जानकीशरणआचार्यः विषयः **संस्कृते संशोधनोपयोगिकोशग्रन्थाः** संगणकश्च, डॉ. दीपक कतिराः विषयः **आधुनिकभारतीयभाषासुदृढाः मूलतः संस्कृतभाषायाः वचोविच्छित्तयः** पञ्चमाधिवेशनं ०६-०२-२०१७ दिनाङ्के जातं सत्राध्यक्षाः डॉ. नरेन्द्रकुमार एल् पण्ड्या एवं वक्तृरूपेण डॉ. शत्रुघ्नपाणिग्राही: विषयः **पूर्वयागस्य वैशिष्ट्यम्,** डॉ. बी. उमामाहेश्वरीः विषयः **प्रत्यक्षप्रमाणस्य अभिनवालोचनम्,** प्राध्यापिका बारैया दृष्टिः विषयः **"અષ્ટાંગયોગમાં પ્રાણાયામ"** तथैव षष्ठाधिवेशनं १८-०२-२०१७ दिनाङ्के जातम्।

## वाक्यार्थपरिषद् २०१७-२०१८

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे अध्यापकानां कृते छात्राणां लाभाय वाक्यार्थपरिषद आयोजनं भवति तथैव अस्मिन् वर्षे अपि १५-०९-२०१७ तमे दिनाङ्के अस्याः परिषद उद्घाटनमभवत्। सत्राध्यक्षाणां माननीयानां कुलपतिवर्याणाम् अर्कनाथचौधरी महाभागानां **प्रमाणमीमांसा** इत्यस्मिन् विषये व्याख्यानमभवत्।

## महिलाजागृतिशिबिरकार्यक्रमवृत्तम्

१६-०९-२०१७ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयेन गुजरातराज्यमहिला-आयोगस्य सहयोगेन वेरावलपाटणसंयुक्तनगरपालिकायाः कम्युनिटी होल इत्यत्र महिलाजागृतिशिबिरं समायोजितम् अस्मिञ्छिबिरे गुजरातराज्यमहिला-आयोगस्य अध्यक्षा श्रीमती लीलाबेन-अंकोलिया आध्यक्ष्यं निरूढवती। अस्य शिबिरस्य उद्घाटनं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिभिः श्रीमद्भिरर्कनाथचौधरिवर्यैः विहितम् । अथात्र अतिथिविशेषत्वेन गुजरातराज्यसर्वकारस्य राज्यमन्त्री श्रीजशाभाईबारडमहोदयः, गुजरातराज्यमहिला-आयोगस्य सचिवपदवाच्या श्रीमती वीणावबेन-पटेलमहोदया, तथैव वेरावलपाटणसंयुक्तनगरपालिकाया अध्यक्षः श्रीजगदीशभाईफोफण्डीमहोदयश्च उपातिष्ठन्त। परम्परामनुसृत्य दीपप्रज्वालनवैदिकस्तुतिपुरस्सरम् अस्य कार्यक्रमस्य समारम्भः समजायत। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवः श्रीमहेन्द्रकुमारदवेवर्यः समागतानां पञ्चमाधितिष्ठितानां समेषाम् अतिथीनां सकुसुमस्तबकं शाब्दिकं स्वागतमकार्षीत् । इमे च महानुभावाः वेरावलनगरस्य उपसहस्रं विद्यार्थिनः उदबूबुधन् । अन्ते अस्य कार्यक्रमस्य संयोजिका प्रो. अर्चना दुबे महोदया सधन्यवादवचः कार्यक्रममम् उपसंहृतवती । इत्थमयं कार्यक्रमः सभोजनं समाप्तिमगात्।







## श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य श्रीप्रमुखस्वामिमहाराजद्वारस्य लोकार्पणविधिः

द्वादश–स्वयंभूज्योतिर्लिङ्गष्वाद्यतमे सोमनाथमहादेवस्य प्रभासक्षेत्रे संस्थिते श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राङ्गणे अत्यद्भुतं द्वारं बीएपीएसस्वामिनारायण–संस्थासौजन्येन विनिर्मापितम्। तस्य नाम श्रीप्रमुखस्वामिमहाराजद्वारम्। ५१ फीट परिमितमुच्चैःस्थं ६९ फीट परिमितं लम्बायमानं १६ फीट स्थवीयं द्वारमिदम्। एतदेव तस्य भव्यतायाः प्रस्फुटनम्। यस्मिन् क्षीरार्णवशिल्पशास्त्रानुसारं नैकविधानां सरस्वतीनां सर्वेषां दर्शनानां कलानाञ्च प्रतिनिधिरूपाः कालिदास–वेदव्यास–पाणिनि–पतञ्जल्याद्यानां मूर्तयः जीवत्कल्पाः शोभन्ते। तस्य लोकार्पणं ६–१०–२०१७ तमे पुण्याहे सम्पन्नम्। तत्काले कुलपतिश्रीअर्कनाथचौधरीमहोदयेन व्याहृतं यदेतादृशं महाद्वारं मया विलोकितेषु २०० संङ्ख्याकविश्वविद्यालयेषु कुत्रापि नैव दृष्टिगोचरम्।

एतस्य द्वारस्य उद्घाटनावसरे बीएपीएस संस्थायाः वरिष्ठसद्गुरुश्रीडॉक्टरस्वामिनः (स्वामिस्वयंप्रकाशदासाः), संस्थाया अन्ताराष्ट्रियसंयोजका ईश्वरचरणदासस्वामिनः, प्रमुखस्वामिमहाराजेन सह चत्वारिंशदधिकवर्षपर्यन्तं भ्रमणकर्तारः स्वामिविवेकसागरदासस्वामिनः राज्यस्तरीय–नागरिकोड्डयनमन्त्रिवर्या जशाभाईबारडमहोदयाः वेरावलपाटणसंयुक्तनगरपालिकाप्रमुखाः श्रीजगदीशभाईफोफंडीमहोदयाः अन्ये च समाहर्त्रादयाः महानुभावा उपस्थिता आसन्।

प्रमुखस्वामिमहाराजस्य वर्तमानानुगामिमहन्तस्वामिमहाराजेन लन्दननगरात् वीडीओमाध्यमेन स्वाशीर्वचांसि व्याहरता सम्भाषितं यत् –अस्माद् द्वाराद् यः कोपि गमनागमनं विधास्यति तस्यान्तःकरणशुद्धिः सम्पत्स्यते।' कार्यक्रमारम्भे आर्षशोधसंस्थाननिदेशकेन संस्कृतस्य महत्त्वं तथा स्वामिनारायणसंस्थायाः एतद्विश्वविद्यालयेन सहारम्भकालात् सम्बन्धो निरूपितः। कुलपतिमहोदयेन भारतीयसंस्कृतिः संस्कृतसम्भृता इत्येतत् प्रत्यपादि। विवेकसागरस्वामिभिः संस्कृत–संस्कृति–सन्त इत्येतेषां त्रयाणां महत्तां व्याहृत्य प्रमुखस्वामिमहाराजेन विहिता तेषामभिवृद्धिः सम्यक् परिवेषिता। ईश्वरचरणस्वामिभिः पूर्वगुरूणां संस्कृतानुरागं प्रतिपाद्य वर्तमानकाले प्रमुखस्वामिमहाराजेन लेखापितानि भद्रेशदासस्वामिविरचितप्रस्थानत्रयीभाष्याणि सगौरवं समुल्लेखितानि। मध्ये छत्रपतिशिवाजीमहाराजस्य सफलताया रहस्यरूपाया गुरुनिष्ठायाः तथा स्वधर्मनिष्ठायाः प्रतिपादकं नाटकं तथा संस्कृत–संस्कृतिसन्तमहिमवृद्धिप्रदं नृत्यं बालयुवभिः निदर्शितम्। २००० संख्याकाः जना गौरवमये कार्यक्रमेऽस्मिन् सम्मिलिताः। तथा च विश्वविद्यालयसञ्चालितमहाविद्यालयस्य प्राचार्यैः नरेन्द्रकुमापण्ड्या बी.ए.पी.एस. संस्थायः स्वामिना द्वारस्य मोक्षद्वारेण






સોમનાથ સંસ્કૃત યુનિ.માં પ્રમુખસ્વામી મહારાજ પ્રવેશદ્વારનું લોકાર્પણ

■ ૫૧ ફૂટ ઉંચાઇ અને ૬૯ ફૂટ લંબાઇ ૧૬ ફૂટ પહોળાઇ

સંદેશ Sat, 07 October 2017


સોમનાથ સંસ્કૃત યુનિ.ના યુવક મહોત્સવનું સમાપન


ફૂલછાબ રાજકોટ ૧૩

સંસ્કૃત યુનિ.ના આંગણે કલાત્મક પ્રવેશદ્વારનું લોકાર્પણ

## अन्ताराष्ट्रियात्महत्यानिवारणदिवसः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन दिनाङ्क ०९–०९–२०१७ आत्महत्यानिवारणदिवस आयोजितः। अयं कार्यक्रमः शैक्षणिकगणेन छात्रैः च सार्थकः अभूत्। अस्मिन् कार्यक्रमे डॉ.डी.एम.मोकरिया महोदयेन प्रासङ्गिकं प्रवचनं दत्तम् एवं च प्रो.विनोदकुमार झा महोदयेन आध्यक्षीयं वक्तव्यम् प्रदत्तम्। अस्मिन् कार्यक्रमे प्रसङ्गानुरूपाया एकस्याः नाटिकाया अपि योगविभागेन प्रस्तुतिः कृताः आसीत्, शीघ्रवक्तृत्वस्पर्धाया अपि आयोजनं कृत्वा कार्यक्रमः सफलः कृतः।

## नवरात्रीमहोत्सवः

प्रतिवर्षमिव अस्मिन्नपि वर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालये नवरात्रीमहोत्सवस्य आयोजनम् २७-०९-२०१७ तमायां रात्रौ ८-९ वादने आचरितम्। अत्र विश्वविद्यालयस्य कुलपतिभिः सह सर्वैः आनन्दः विहितः। कार्यक्रमे सर्वेऽपि अधिकारिणः छात्राश्च उपस्थाय नवरात्ररास-गरबां प्रदर्शितवन्तः। कार्यक्रमस्य व्यवस्थापनं सञ्चालनं च डॉ. जयेशमुंगरा महोदयः अकरोत्।













## श्रीसोमनाथसंस्कृतविश्वविद्यालयेन अभिनवभाष्यकार इति उपाधिना सम्मानिताः पूज्यभद्रेशदासस्वामिनः

प्रमुखस्वामिमहाराजेन गाँधीनगरे स्थापितस्य अक्षरधाम्नः तथा च श्रीसोमनाथसंस्कृतविश्वविद्यालयसम्बद्धेन आर्षशोधसंस्थानम् इत्यस्य रजतजयन्त्युत्सवः महता वैभवेन समाचरितः। एतदङ्गतया आर्षशोधसंस्थया २८ ओक्टोबर २०१७ तमे दिनाङ्के अक्षरपुरुषोत्तमदर्शनम् विविधदृष्टिकोण इति विषयमादाय एकस्य विशिष्टस्य परिसंवादस्य आयोजनं कृतम् आसीत्। प्रसिद्धवेदविदुषा आर. कृष्णमूर्तिशास्त्रिणा इतरैश्च महानुभावैः दीपप्राकट्यद्वारा एतस्य कार्यक्रमस्य उद्घाटनं कृतम् आसीत्। तदनु साधुभद्रेशदासविरचितस्य स्वामिनारायणसिद्धान्तसुधा इति ग्रन्थः तथा अक्षरपुरुषोत्तमदर्शनम् इति विषयमादाय एका विद्वत्परिचर्या आयोजिता यत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. अर्कनाथचौधरी, आचार्यश्रीवत्सगोस्वामी, भारतीयदार्शनिकानुसन्धानपरिषदः अध्यक्षः प्रो. एस.आर. भट्टः, पूर्णप्रज्ञविद्यापीठस्य प्रांशुपालः प्रो. हरिदासभट्टः, प्रो. युगलकिशोरमिश्रः, वेदनिधिः आर. कृष्णमूर्तिशास्त्री, कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. पङ्कजचांदे, बाबासाहेब–आम्बेडकरमुक्तविश्वविद्यालयस्य कुलपतिः प्रो. पङ्कजजानी, डॉ. गिरीशकुमारः, डॉ. गजेन्द्रपण्डा, डॉ. जानकीशरणः आचार्य इत्यादिविद्वांस उपस्थिता आसन्।

अत्रावसरे कुलपतिना प्रो. अर्कनाथचौधरीमहोदयेन उक्तं यत् शिक्षणजगति अध्यात्मजगति च अस्य बीएपीएस सम्प्रदायस्य बृहमूल्यं योगदानमस्ति। अनया संस्थया श्रीसोमनाथसंस्कृतविश्वविद्यालये निर्मितं भव्यद्वारं भारतीयसंस्कृतेः प्रवेशद्वारं वर्तते। साधुभद्रेशदासस्वामिविरचितं प्रस्थानत्रयीभाष्यं समग्रभारतीयदर्शनस्य प्रातिनिध्यं वहति। एतद्भाष्यं संस्कृतभाषायाः पुनरुत्थाने एकं निदर्शनमस्ति। एतस्याध्ययनेन संस्कृतविदुषां एका नवीना परम्परा स्थापिता भविष्यति। अतः अस्माकं विश्वविद्यालयः साधुभद्रेशदासस्वामिनम् अभिनवभाष्यकार इति उपाधिना सभाजयतीति।





## भवननिर्माणविभागस्य कार्याणि

- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मुख्यप्रवेश–द्वारस्य निर्माणं श्रीप्रमुखस्वामिचरणानाम् आशीर्वादैः BAPS संस्थायाः सहयोगेन ०६–१०–२०१७ तमे दिनाङ्के पूर्णता गतम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे संरोपितानां वृक्षाणां जलसंरक्षणाय ड्रिप इरीगेशन कार्यं २३–०९–२०१७ तमे दिनाङ्के पूर्णं जातम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयमुख्यभवनस्य परिष्करणं नवीनीकरणं पाषाणकर्म च सम्प्रति जायमानम् अस्ति।

## सम्पूर्णानन्द संस्कृतविश्वविद्यालये मान्नीयकुलपतीनां मुख्यतिथित्वेन दीक्षान्तप्रवचनम्

महतः गौरवस्यायं विषयो यदस्माकं विश्वविद्यालयस्य कुलपतयः श्रीअर्कनाथ चौधरी महाभागाः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पञ्चत्रिंशत्तमे दीक्षान्तसमारोहे मुख्यातिथित्वेन दीक्षान्तप्रवचनमकुर्वन्। भारतस्य प्राचीनतमे विश्वविद्यालये दीक्षान्तप्रवचनाय इमे महानुभावाः उत्तरप्रदेशस्य राज्यपालमहोदयैः समाहूताः। अस्य विश्वविद्यालयस्य पूर्वं सञ्जातेषु दीक्षान्त समारोहेषु भारतस्य पूर्वराष्ट्रपतयः प्रो. राधाकृष्णन्, डॉ.शङ्करदयाल शर्मा, के.आर.नारायणन् तथा पूर्वप्रधानमन्त्रिणः श्रीलालबहादुरशास्त्रिण इन्दिरागांधी अन्येऽपि विशिष्टाः महानुभावाः दीक्षान्तप्रवचनं प्रदत्तवन्तो वर्तन्ते। तत्रैव अस्माकं कुलपतिभिरपि दीक्षान्तप्रवचनं विधाय सर्वेषामस्माकं गौरवं प्रवर्धितं वर्तते।

**अखिल भारतीय शास्त्रीयस्फूर्ति स्पर्धा में गुजरात से श्रीसोमनाथ संस्कृत युनिवर्सिटी के दो छात्र राहुल कुमार झा और अरु ण कमार पांडेय को प्रथम क्रमांक प्राप्त हुआ।**

## ब्रह्मसूत्रस्वामिनारायणभाष्यश्लाका – कार्यशाला

BAPS स्वामिनारायण संशोधनकेन्द्रस्य तथा च श्रीसोमनाथसंस्कृतविश्वविद्यालस्य संयुक्ततत्त्वावधानेन एका दिनत्रयव्यापिनी कार्यशाला BAPS स्वामिनारायणसंस्कृतमहाविद्यालये ०८–०९–२०१७ तः१०–०९–२०१७ पर्यन्तम् आयोजिता। अस्यां कार्यशालायां विश्वविद्यालय सम्बद्ध–महाविद्यालयेभ्यः सप्तत्यधिकाः छात्राः भागमगृह्णन्। प्रथमे दिवसे कार्यशालासंयोजकेन श्रीगजेन्द्रपण्डामहोदयेन प्रास्ताविकं व्याख्यानं प्रदत्तम्। ततः साधुश्रुतिप्रकाशदासमहोदयेन जिज्ञासाधिकरणस्य पाङ्क्तमध्ययनम् अकार्षीत् । अस्यां कार्यशालायाम् दुतेषामपि विदुषां व्याख्यानानि समज़ायन्त । यथा डॉ. जानकीशरण आचार्यस्य अर्थविबोधेन सहः कण्ठपाठः तथा बी. उमामाहेश्वरी महोदयायाः भारतीयदर्शनेषु वेदान्तदर्शनम् ब्रह्मसूत्राणां महत्त्वञ्च इति विषये व्याख्यानम् अभवत्। कार्यशालायाः अन्तिमे दिवसे पूज्य स्वयम्प्रकाशस्वामिभिः सर्वेभ्यः आशीर्वादाः व्याहृताः। कार्यशालायाः अन्ते कार्यशालासंयोजकेन डॉ. जानकीशरण आचार्येण सर्वेषां कृते धन्यवादज्ञापनं कृतम्। अस्याः कार्यशालायाः संपूर्णं विवरण डॉ. जानकीशरण आचार्यस्य सविधे वर्तते।



## राज्यस्तरीयस्पर्धा

**२३ दिसम्बर २०१७ तमे दिनाङ्के स्पर्धाअनिरूद्धाचार्य सं.म.विद्याालये राज्यस्तरीया शास्त्रीयस्पर्धा अभवत्। तत्र सफलाः इमे छात्राः।**

१. अरुणपाण्डेयः – प्रथमं स्थानं (Quiz स्पर्धा)
२. राहुल झा – प्रथमं स्थानं (Quiz स्पर्धा)
३. अरुण पाण्डेय – प्रथमं स्थानं (समस्यापूर्तिस्पर्धा)
४. जयंपाढः – तृतीयं स्थानं – व्याकरणभाषणम्
५. राहुल झा – तृतीयं स्थानं – मीमांसाभाषणम्
६. अरुण पाण्डेय – तृतीयं स्थानं – न्यायभाषणम्
७. प्रकाश मिश्रः– तृतीयं स्थानं – वेदभाष्यभाषणम्
८. राजा जानी – तृतीयं स्थानं – जैनबौद्धभाषणम्
९. बालासरा रोहित – तृतीयं स्थानं– साहित्यभाषणम्

## अखिलभारतीयशास्त्रीयस्फूर्ति स्पर्धा

अखिलभारतीयशास्त्रीयस्फूर्ति स्पर्धा में गुजरात से श्रीसोमनाथ संस्कृत युनिवर्सिटी के दो छात्र राहुल कुमार झा और अरुण कुमार पांडेय को प्रथम क्रमाङ्क प्राप्त हुआ।

## नवषष्टितमः गणतन्त्रोत्सवः (69 th)

प्रतिवर्षमिव अस्मिन्नपि वर्षे श्रीसोमनाथ संस्कृतविश्वविद्यालये नवषष्टितमः गणतन्त्रदिवस आचरितः। अत्र विश्वविद्यालस्य कुलपतिभिः सह सर्वैः ध्वजवन्दनं विहितम्। ध्वजवन्दनान्तरं सांस्कृतिकः कार्यक्रमः आयोजितः, यत्र देशभक्तिगीतं, छात्राणां प्रतिभाः, नाटकं, समूहगीतं, नृत्यम्, इत्यादीनां विद्यार्थिभिः प्रस्तुतिः कृताः। कार्यक्रमे सर्वेऽपि अधिकारिणः छात्रः च उपस्थाय राष्ट्रभक्तिं प्रदर्शितवन्तः। कार्यक्रमस्य व्यवस्थापनं सञ्चालनं च डॉ. जयेशमुंगरा महोदयः अकरोत्।










## भारतीयतटरक्षकस्य परिचयकार्यक्रमः

